# वैशेषिकदर्शस्येतिहासपरिशीलनम्

**श्याममणिनेपालः**

Department of Prachin Nyaye
Balmeeki Vidyapeeth
Kathmandu, Nepal

*Submitted:* 28 Nov. 2025
*Reviewed : 18 Dec. 2025*
*Accepted : 27 Dec. 2025*
**DOI:** *10.3126/kdk.v6i1.90134*

***Corresponding Author:***
*Shyammani Nepal*
***Email:*** *su.philosophy.np@gmail.com*
**ORCID:** *https://orcid.org/0009-0008-1654-0761*

*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**
***Kaumodaki***
**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal
**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about

**Published by :**
Research Management Cell
Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**सारः** प्राच्यदर्शनेषु महत्त्वपूर्णं विशिष्टञ्चेदं वैशेषिकदर्शनम् । महर्षिणा कणादेन प्रोक्तत्वात् कणाददर्शनमिति नामान्तरेणापि प्रसिद्धम् । महर्षेः कणादस्यैवापरं नाम उलूकः, इत्यतः तन्नाम्ना औलुक्यदर्शमिति च प्रथितम् । परमाणुकारतावादप्रतिपादनात् परमाणुवादिदर्शनमित्यपि प्रसिद्धम् । यद्यपि दर्शनस्यास्य प्रणेता महर्षिः कणादः, अतः कणादादेव प्रारब्धमिदं दर्शनमिति वक्तुं शक्यम्, तथापि वेदस्मृतिपुराणादिशास्त्रेषु च एतद्दर्शनवर्णिता विषयाः प्राप्यन्ते, क्वचित् कणादस्यैव नाम्ना, क्वचिच्च एतत्समानतन्त्रस्य न्यायदर्शनस्य प्रसङ्गेन च एतद्दर्शनस्य चर्चा च समुपलभ्यते इत्यतो दर्शनमिदमनादि इत्यपि वक्तुं शक्यम् । सूत्रकारात् कणादादारभ्य प्रशस्तपादाचार्य–श्रीधराचार्य–उदयनाचार्य–बल्लभाचार्य–शङ्करमिश्रप्रभृतिभिर्बहुभिर्दार्शनिकैः वैशेषिकदर्शनस्य विस्तारः कृत इति एतद्दर्शनेतिहासाध्ययनेन ज्ञायते । ख्रिष्टाब्दस्य दशमशताब्दिपूर्वकालः महर्षेः कणादस्य काल इतीतिहासविद्भिरुच्यते । ईशाया दशशतवर्षपूर्वकालात् सूत्रकालाद् वा ख्रिष्टाब्दस्य सप्तदशशताब्दीकालं तर्कसंग्रहकालं यावत् मूलरूपेण, ततश्च व्याख्योपव्याख्याविश्लेषणानुसन्धानानुवादादिरूपेण इदानीन्तनकालं यावद् बहव आचार्याः समागताः, यैः तत्तत्काले विशेषग्रन्थप्रणयनेन वैशेषिकदर्शनस्य साहित्यभाण्डारः सुसमृद्धः कृत इति वक्तुं शक्यते । वैशेषिकदर्शनस्य प्रभावेणैव अधुना प्रायः सर्वेष्वपि दर्शनेषु प्रमेयचिन्तने वैशेषिकदर्शनस्य प्रभावोऽनुभूयते, तत्तद्दर्शनग्रन्थेषु दृश्यते च । अतोऽस्मिन् लेखे वैदिकसाहित्येषु, स्मृतिपुराणादौ च वैशेषिकदर्शनविषयाः कथं प्राप्यन्ते, कणादकालादारभ्य अधुना यावत् मुख्यरूपेण के के आचार्या दार्शनिकाश्च बभुवुः, तैः कीदृशानि ग्रन्थरत्नानि प्रणीतानि, तेषां प्रभावश्च आधुनिकदर्शनजगति कीदृशश्चास्तीति विषयाः परिशीलिताः सन्ति ।

मुख्यशब्दाः : इतिहासः, उपस्कारः, पदार्थशास्त्रम्, भाष्यम्, वैशेषिकम्, सूत्रम् ।

**विषयप्रवेशः**

प्राच्यपाश्चात्त्यभेदेन द्विधा विभक्तानि नैकानि दर्शनानि समुपलभ्यन्ते दर्शनजगति । तत्रापि प्राच्यदर्शनेषु च वैदिकावैदिकभेदेन द्विविधो भेदो वर्तते। तत्र अवैदिकदर्शनेषु चार्वाक–बौद्ध–जैनदर्शनानि परिगण्यन्ते चेत् वैदिकदर्शनेषु न्याय–वैशेषिक–साङ्ख्य–योग–पूर्वमीमांसा–वेदान्तदर्शनानि परिगण्यन्ते। इदानीं तावत् वैदिकदर्शने आस्तिकदर्शने वा परिगणितस्य वैशेषिकदर्शनस्य इतिहासः कः, कदारभ्य दर्शनमिदं प्रारब्धम् ? तत्र के के आचार्याः समागताः ? तैश्च के ग्रन्थाः प्रणीता इत्यादिविषयस्य ज्ञानं दर्शनशास्त्राध्येतॄणां कृते सुतरामावश्यकमेव। इदं दर्शनं काणाददर्शनम्, औलूक्यदर्शनम्, पदार्थशास्त्रम्, पदार्थधर्मसंग्रह इत्यादिभिरनेकैर्नामभिः प्रचलितमस्ति। तदेव भाष्यकारेण प्रशस्तपादाचार्येण अस्य दर्शनस्य पदार्थधर्मसंग्रह इति स्पष्टमुक्तं स्वकीयस्य भाष्यस्य मङ्गलाचरणे एव – 'प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः। पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः' इति। इदमेव पदार्थशास्त्रं वैदिककालादारभ्यैव प्रवृत्तमासीदिति इतिहासाध्ययने स्पष्टं भवति। अतो लेखेऽस्मिन् तदानीमस्य शास्त्रस्य स्वरूपं कथमासीदिति अत्र क्रमेण परिशील्यते। तथैव वैशेषिकदर्शनस्याचार्याणां स्थानकालादीनां परिचयः, तैः प्रतिपादितानां ग्रन्थानाञ्च परिचयश्च लेखेऽस्मिन् परिशील्यते। लेखस्य विस्तरभयात् एतद्दर्शनस्य परिचयमदत्वैव साक्षात् विषये एव प्रविश्यते, दर्शनपरिचयस्तु अन्यत्रैव बहुत्र प्रतिपादितत्वात् । यद्यपि दर्शनानामितिहासविषये परिचयादिविषये च पूर्वमपि बहुभिः विद्वद्भिः बहुधा अध्ययनं कृतं वर्तते, संस्कृतहिन्दीनेपाल्यादिभाषासु नैके ग्रन्थाश्च समुपलभ्यन्ते तथापि एतद्दर्शनस्यैव समग्रेतिहासमादाय स्पष्टमध्ययनं न लभ्यते इत्यत एतस्येतिहासाचार्यादीनामध्ययनाय मे प्रवृत्तिः।

**समस्याकथनम्**

अत्र प्रस्तुते वैशेषिकदर्शनस्येतिहासपरिशीलनम् इत्यस्मिन् विषये सन्ति नैकाः समस्याः। तासु काश्चन मुख्यत्वेन दृश्यन्ते। ताश्चाधोनिर्दिष्टानुसारं वर्तन्ते –

(क) वैशेषिकदर्शस्येतिहासः कः ?

(ख) वैशेषिकदर्शनस्याचार्याणां देशकालादीतिवृत्तं किम् ?

(ग) वैशेषिकदर्शनस्य साहित्यानि कानि ?

**अध्ययनस्योद्देश्यम्**

लेखस्यास्य मुख्यमुद्देश्यं वैशेषिकदर्शनस्येतिहासपरिशीलनम् इत्याख्ये विषये केन्द्रीभूय समस्याकथने उपस्थापितानां समस्यानां समाधानान्वेषणमेव अस्ति। फलतोऽस्य लेखस्य उद्देश्यमधोनिर्दिष्टानुसारमस्ति –

(क) वैशेषिकदर्शनस्येतिहासपरिशीलनम्।

(ख) वैशेषिकदर्शनस्याचार्याणां देशकालादीनां परिशीलनम्।

(ग) वैशेषिकदर्शनस्य साहित्यानां परिशीलनञ्च।

## पूर्वकार्यस्य समीक्षणम्

पौरस्त्यदर्शनेषु वैशेषिकदर्शनस्य महत्त्वपूर्णं स्थानं वर्तते । प्रायः प्राधान्येन पदार्थचिन्तनपरत्वाद्दर्शनमिदं पदार्थशास्त्रमित्यपि उच्यते । अतः दर्शनस्यास्य महत्त्वं न केवलं प्राच्यदर्शनजगति अपितु पाश्चात्यदर्शनजगत्यपि सादरेण स्वीकृतं वर्तते । यद्यपि वैशेषिकदर्शनमादाय पूर्वमपि बहुभिः विद्वद्भिः बहुधा चिन्तितं वर्तते तथापि एतस्यैव दर्शनस्य इतिहासमादाय सरलया दृष्ट्या भिन्नं चिन्तनं विहितमिति तु न दृश्यते इत्यतः एतद्विषये अनुसन्धानाय मे प्रवृत्तिः । इतः पूर्वं कैः कैरनुसन्धातृभिः कथं चिन्तनं विहितमिति अतिसंक्षेपेणात्र प्रस्तूयते ।

भारतीयदर्शनस्य महता विदुषा सर्वपल्लीराधाकृष्णन इत्यनेन भारतीय दर्शन (ख्रैस्ताब्दम् १९७३, तृतीयसंस्करणम्) इत्याख्ये स्वग्रन्थे समेषां भारतीयदर्शनानां समालोचनक्रमे प्रसङ्गानुसारेण वैशेषिकदर्शनमपि समालोचितमस्ति । तथाप्यनेन विदुषा एतद्दर्शनस्य इतहासमादाय पृथग् विशेषचिन्तनं कृतमिति तु न दृश्यते ।

विदुषा श्रीरामशर्माचार्येण न्याय एवं वैशेषिकदर्शन (ख्रैस्ताब्दम् २००२) इत्याख्ये ग्रन्थे न्यायवैशेषिकदर्शनयोः सूत्राणां व्याख्यानं विहितमस्ति । अस्मिन् ग्रन्थे अनेन विदुषा काणादसूत्राणां सम्यक्तया अर्थः कृतो वर्तते परन्तु तावता वैशेषिकदर्शनस्य इतिहासावबोधनाय भिन्नं समालोचनात्मकमध्ययनं कृतं नास्ति ।

भारतीयसमालोचकेन चन्द्रधरशर्मणा स्वग्रन्थे भारतीय दर्शन आलोचन और अनुशीलन (ख्रैस्ताब्दम् २०२२) इत्यस्मिन् सर्वेषां वैदिकावैदिकदर्शनानां समालोचनक्रमे प्रसङ्गानुसारेण न्यायवैशेषिकर्दनयोः समालोचना विहिता अस्ति । तत्र चानेन दर्शनानां वर्णनीयविषये तु महता श्रमेण समालोचना विहिता परन्तु वैशेषिकदर्शनस्य इतिहासप्रतिपादनाय तावत् स्पष्टमधिकं न किमपि चर्चितमस्ति ।

प्रवेशसक्सेना इत्यनेन विदुषा भारतीय दर्शनों मे क्या है (ख्रैस्ताब्दम् २००५) इति स्वानुसन्धानग्रन्थे सर्वेषां पौरस्त्यदर्शनानां समालोचनं विहितमस्ति । तत्र चामुना विदुषा न्यायवैशेषिकदर्शने च समालोचिते स्तः । परन्तु अनेन च एतन्दर्शनेतिहासमधिकृत्यैव भिन्ना चर्चा कृता नास्ति ।

नैपालकेन विदुषा प्राध्यापकेन पद्मप्रसादभट्टराई महाभागेन नेपालीभाषायां लिखिते पौरस्त्यदर्शन एक चिनारी (२०७४) इत्यस्मिन् ग्रन्थे सर्वेषां पौरस्त्यदर्शनानां समालोचनं विहितमस्ति । अनेन विदुषा अस्मिन् स्वानुसन्धानग्रन्थे दर्शनसमालोचनक्रमे न्यायादिदर्शनानां परिचयः प्रदत्तोऽस्ति । पौरस्त्यदर्शनानां परिचयात्मकज्ञानाय ग्रन्थोऽयं महदुपकारी अस्ति । परन्तु अस्मिन्नपि ग्रन्थे अनेन विदुषा वैशेषिकदर्शनेतिहासमादाय पृथग्ररूपेण समीक्षणं न विहितं वर्तते ।

एतावता वक्तुं शक्यते यत् बहुभिः विद्वद्भिः बहुषु ग्रन्थेषु अनुसन्धानकार्येषु च वैशेषिकदर्शनस्य समालोचनं विहितमस्ति । क्वचित् प्राधान्येन क्वचिच्च गौणेन यथाप्रसङ्गं वा तैः वैशेषिकेतिहासोपि समीक्षितो वर्तते परन्तु भिन्नरूपेण वैशेषिकदर्शनेतिहासप्रदशर्नं तु न दृश्यते इत्यत एतस्मिन् विषये न्यूनता प्रतिभात्येव । अतश्चास्मिन् लेखे वैशेषिकदर्शनस्येतिहासपिरशीलनपूर्वकं तद्दर्शनाचार्याणां ग्रन्थानाञ्च समालोचनं विधीयते ॥

**अध्ययनविधिः**

अस्य लेखस्य कृते आवश्यकसामग्रीणां सङ्कलनाय पुस्तकालयीयाध्ययनविधिरेव प्राधान्येन स्वीकृतोऽस्ति। तत्र चास्मिन् लेखे वैशेषिकदर्शनविषयप्रतिपादकाः संस्कृतमूलाकरग्रन्थाः, इतिहासवर्णनपरा ग्रन्थाः, नेपालीभाषायां हिन्दीभाषायाञ्च प्रकाशिता वैशेषिकदर्शनसम्बद्धा विविधा ग्रन्था एव प्राथमिकसामग्रीत्वेन गृहीताः सन्ति। अन्यदर्शनेषु प्रतिपादिता इतिहाससम्बद्धविषयाः, पौरस्त्यदर्शनविशारदैर्लिखिता लेखाश्च द्वितीयकसामग्रीत्वेन प्रयुक्ताः सन्ति। एवमेव अस्मिन् लेखे यथावश्यकमागमनात्मकविधेर्निगमनात्मकविधेश्च प्रयोगं विधाय व्याख्यात्मको विश्लेषणात्मको विधिश्च प्रयुक्तोऽस्ति।

**सैद्धान्तिकी अवधारणा**

प्राच्यदर्शनानि खलु तत्त्वप्रतिपादनाय प्रवृत्तानि। श्रुतिस्मृतिपुराणेतिहासेषु शास्त्रेषु विचारत्वेन लिखितानां सिद्धान्तानां ग्रन्थाकारे प्रवर्तनं तत्तत्काले महर्षिभिः सूत्राणि विरचय्य कृतमस्ति। न केवलं वैदिकदर्शनानामपि तु अवैदिकदर्शनानाञ्च सिद्धान्ता वैदिकवाङ्मयेषु लभ्यते इति सूक्ष्माध्ययनेन ज्ञायते। वैदिकदर्शनानां तु मूलबीजमेव श्रुतिस्मृत्यादिवाङ्मयमिति निश्चप्रचमेव वक्तुं शक्यते। तानेव विचारानादाय महर्षिणा बादरायणेन ब्रह्मसूत्राणि विरचय्य वेदान्तदर्शनं प्रणीतञ्चेत् महर्षिणा जैमिनिना मीमांसासूत्राणि विरचय्य पूर्वमीमांसादर्शनं प्रवर्तितम्। तथैव महर्षिणा कपिलेन सांख्यदर्शनं प्रसारितञ्चेद् पतञ्जलिना योगदर्शनं प्रणीतम्। एवमेव महर्षिणा कणादेन वैशेषिकसूत्राणि विरचितानि चेत् गौतमेन न्यायसूत्राणि प्रणीतानि। एवञ्च इमे एव महर्षयः तत्तद्दर्शनानां प्रवर्तकत्वेन लोकविश्रुताः सन्ति। सूत्रकारानन्तरं तत्तत्समये बहुभिः विद्वद्भिः सूत्राणां भाष्याणि कृतानि, ततोऽन्यैः विद्वद्भिः भाष्याणामपि व्याख्योपव्याख्यानं कृतमस्ति। एवञ्च समेषां दर्शनानाम् इतिहासो वैदिकवाङ्मयेषु कथं प्राप्यते इति अनुसन्धानमवश्यं कर्तव्यमेव। तथैव कस्मिन् काले देशे च सूत्राणि रचितानि, भाष्याणि कृतानि, व्याख्यानानि कृतानीति विषये च अनुसन्धानमावश्यकमस्ति। एवमेव अन्यैश्च कैः कैः विद्वद्भिः कस्मिन् कस्मिन् काले, कस्मिन् कस्मिन् देशे च स्वतन्त्रान् ग्रन्थान् विरचय्य तत्तद्दर्शनानां साहित्यागारो वर्धित इत्यस्मिन् विषये च अध्ययनं कर्तव्यं भवति अध्येतृभिः। परन्तु एकस्मिन् लघुनि लेखे एव समग्रस्य प्राच्यवाङ्मयस्य सर्वेषां दर्शनानां वेतिहासाध्ययनं कर्तुं न शक्यते इत्यतः अस्मिन् लेखे केवलं वैशेषिकदर्शनस्य इतिहासाचार्यसाहित्यानामध्ययनं कर्तव्यमिति विषयमुररीकृत्य वैशेषिकदर्शसिद्धान्तमादायैव एतद्दर्शनस्येतिहासस्य परिशीलनं क्रियते।

**वैशेषिकदर्शनस्येतिहासः**

वैदिकदर्शनेषु कस्य प्राचीनत्वं कस्य वा अर्वाचीनत्वमिति निर्धारणमत्यन्तक्लेशसाध्यम्। तत्रापि न्यायवैशेषिकदर्शनयोः समानतन्त्रत्वात् अनयोर्दर्शनयोर्मध्ये च न्यायदर्शनस्य आन्वीक्षिक्यादिशब्दैः परिगणना उपनिषदादिग्रन्थेष्वेव कृता दृश्यते यथा, न तथा वैशेषिकदर्शनमधिकृत्य क्वचित्। किन्तु सूत्राक्षराणि दृष्ट्वा इतिहाससाध्ययनेन च न्यायसूत्रापेक्षया काणादसूत्राण्येव प्राचीनानि सन्तीति ज्ञायते। वैशेषिकोक्तपरमाणुवादासत्कार्यवादादीनामपि प्राचीनग्रन्थेषु खण्डनादिकं दृश्यते। अतोऽस्य वैशेषिकदर्शनस्य प्राचीनत्वं स्वीकार्यमेव। तथा चेदं वक्तुं शक्यते – प्राचीनग्रन्थेषु यत्र तत्र

वर्णितान् विषयान् आदायैव कालान्तरे महर्षिणा कणादेन सूत्राक्षराणि योजयित्वा दर्शनमिदं प्रवर्तितं स्यात् । कणादेन प्रवर्तितत्वात् दर्शनस्यास्य नाम 'काणाददर्शनम्' इति विख्यातं वर्तते । कुत्रचित् 'औलूक्यदर्शनम्' इति नामापि प्राप्यते । तदपेक्षयापि अस्य ख्यातिः 'वैशेषिकदर्शनम्' इति नाम्नाऽस्ति । अस्य नाम कथं वैशेषिकदर्शनं जातमित्यत्र काश्चन उक्तयः प्राप्यन्ते । तासु, नित्यद्रव्याणां परस्परं भेदसाधनाय विशेषनामकातिरिक्तपदार्थस्वीकृतत्वात् दर्शनमिदं वैशेषिकदर्शनमिति कथितमित्येका युक्तिः । इयमेव युक्तिः समीचीना च । कणादेनोक्तत्वात् 'काणाददर्शनम्' इति तु सुलभमेव । औलूक्यदर्शनम् इति नाम कथमागतमित्यत्र च विभिन्नैः विद्वद्भिः विभिन्नाः तर्काः प्रदर्श्यन्ते । केचित् भगवता शंकरेण उलूकरूपेण कणादाय इदं शास्त्रमुपदिष्टमतोऽस्य नाम औलुक्यदर्शनं जातमिति कथयन्ति । तस्मिन् काले जनाः कणादम् 'उलूकस्य शिशुः' इति नाम्ना व्यवहरन्ति स्म, अतस्तस्य दर्शनम् औलूक्यदर्शनमिति केचित् । अन्ये तु अयं कणाद उलूकवत् रात्रौ भ्रमित्वा अन्यैः त्यक्तमन्नं स्वीकरोति स्म, अतोऽस्य दर्शनमौलूक्यदर्शनमभूदिति मन्यन्ते । अपरे तु उलूकस्य तमसा सह विशिष्टः सम्बन्धोऽस्ति, यतः अयं पक्षी रात्रावपि द्रष्टुं शक्नोति, तद्वत् अस्मिन् दर्शनेऽपि तमो न पृथक् द्रव्यमपि तु तेजोऽभाव एवेति प्रतिपादितमस्ति । अत उलूकवदस्ति इदं दर्शनं तदर्थम् औलूक्यदर्शनमिति ख्यातम् इति वदन्ति । तदेवाह श्रीहर्षोऽपि नैषधीयचरिते – 'ध्वान्तस्य वामोरु विचारणायां वैशेषिकं चारुमतं मतं मे । औलूकमाहुः खलु दर्शनं तत्, क्षमं तमस्तत्त्वनिरूपणाय ॥' (श्रीहर्षः, नैषधीयचरितम्–२२–३६) इति । इदानीं तावद् एतद्दर्शनस्य सूत्रकालात् पूर्वं कीदृशं स्वरूपमासीत्, सूत्ररचनाया अनन्तरञ्च केन स्वरूपेण विकसितमिति विचार्य प्राक्सूत्रकालः, सूत्रकालः, व्याख्योपव्याख्याकालश्चेति अस्य दर्शनस्येतिहासं त्रेधा विभज्य दर्शनस्यास्य स्वरूपं कथमासीत्, कथमस्तीति चात्र क्रमेण परिशील्यते ।

### *प्राक्सूत्रकाले वैशेषिकशास्त्रम्*

प्राक्सूत्रकालः, सूत्रकालः, व्याख्योपव्याख्याकालश्चेति त्रेधा विभज्य अस्य दर्शनस्येतिहासस्याध्ययनं कर्तुं शक्यते इति पूर्वमुक्तमेव । अतश्चास्मिन् प्रकरणे सूत्रकालात् पूर्वं श्रुतिस्मृतीतिहासपुराणादिषु वाङ्मयेषु कथं केन रूपेण च वैशेषिकदर्शनस्य विषयाः प्राप्यन्ते, तद्दर्शनस्य संकेतश्च कथं कृतोऽस्तीति विचार्यते । यद्यपि श्रुतिस्मृतीतिहासपुराणादिषु वाङ्मयेषु सर्वत्रापि वैशेषिकशब्देनैव उल्लेखो न प्राप्येत, तथापि एतद्दर्शनस्य न्यायदर्शनसमानतन्त्रत्वात् यत्र कुत्रापि न्यायदर्शनस्य संकेतः प्राप्यते, स च संकेतो वैशेषिकदर्शनस्य कृतेऽप्यस्तीति चेतिहासविदां सम्मतमस्ति । वेदा उपनिषदश्च सर्वापेक्षया प्राचीनतमा ग्रन्थाः, ते एव श्रुतिशब्देन व्यवह्रियन्ते । तासु श्रुतिषु मध्ये छान्दोग्योपनिषदि सङ्केतरूपेण तर्कशास्त्रस्य प्रसङ्गो दृश्यते । तत्रोक्तासु विद्यासु तर्कविद्यापि एकेति तदध्ययनेन ज्ञायते । तथा हि – 'स होवाचर्ग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि' (छान्दोग्योपनिषत् ७–१–२) अत्रोक्तेन वाकोवाक्यमिति पदेन तर्कशास्त्रमुच्यत इति शंकराचार्याः । तर्कशास्त्रमित्यनेन वैशेषिकमपि ग्रहणीयम् । अन्यत्रापि छान्दोग्योपनिषदि एव शब्द आकाशाश्रित इति स्वीक्रियते, एतदेव वैशेषिकशास्त्रे 'शब्दगुणकमाकाशम्' इति पदेन शब्दस्याश्रय आकाश एवेति स्वीकृतः । शब्दस्य आकाशगुणत्वमिति प्रतिपादकशास्त्रं तु वैशेषिकमेव । 'आकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति' (छान्दोग्योपनिषत् ७–१२–१) इत्यनेन ज्ञायते यद् वैशेषिकशास्त्रस्य शब्दस्य आकाशगुणत्वकथनस्य बीजमुपनिषदेव आसीदिति । इदमेव वाक्यं वैशेषिकदर्शनस्य संकेताय प्रवृत्तं सर्वापेक्षया प्राचीनतममिति वक्तुं शक्यम् । तथैव वैशेषिकदर्शनसम्मतस्य प्रमाणभूतस्यानुमानप्रमाणस्य उल्लेखो

मुण्डकोपनिषदि लभ्यते, 'नायमात्मा बलहीनेन लभ्यो न च प्रमादात् तपसो वाप्यलिङ्गात्' (मुण्डकोपनिषत् ३–२–४) इति । अत्र अलिङ्गादिति पदेन नानुमानाद् इति स्पष्टं ज्ञायते । तथैव तैत्तिरीयारण्यकेऽपि अनुमानशब्दस्य प्रयोगः प्राप्यते । 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानचतुष्टयम् । एतैरादित्यमण्डलं सर्वैरेव विस्यते' (तैत्तिरीयारण्यकम् १–२), अत्रापि अनुमानशब्देन वैशेषिकसम्मतस्य अनुमानस्यापि ग्रहणं भवति ।

श्रुतिष्विव स्मृतिष्वपि एतद्दर्शनस्य संकेतः प्राप्यते । याज्ञवल्क्यस्मृतौ न्यायशास्त्रं चतुर्दशविद्यासु एकविद्येति स्वीकृतमस्ति – 'पुराणं न्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ (या.स्मृ. १–३) । तथैवान्यत्रापि – 'अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः । पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥ (वि.पु. ३–६–२८) । उक्तश्लोकद्वयेऽपि न्यायपदेन न्यायशास्त्रस्यैव ग्रहणं भवति चेत् द्वितीयश्लोके प्रयुक्तेन विस्तरपदेन वैशेषिकदर्शनं ग्रहणीयमिति तु जयन्तभट्टेनापि स्वीकृतमस्ति – वैशेषिकाः पुनरस्मदनुयायिन एवेत्येवमस्यां जनतासु प्रसिद्धायामपि षट्तर्क्यामिदमेव तर्कन्यायविस्तरशब्दाभ्यां शास्त्रमुक्तम् । (जयन्तभट्टः, न्यायमञ्जरी, प्रथमाह्निकम्, प्रमाणप्रकरणम्) । तथैव मनुस्मृतौ तर्कशास्त्रस्य महत्त्वं प्रतिपादयन् लिखितमस्ति – 'आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ (मनुस्मृति, १२–१०६) । अत्र अनुसन्धानार्थं तर्कस्य आवश्यकता प्रदर्शिता । एवमेव अन्यत्रापि मनुस्मृतावेव – त्रैविद्यो हेतुकस्तर्को नैरुक्तो धर्मपाठकः । त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा ॥ (मनुस्मृति, १२–१११) । अत्रोभयत्रापि तर्कशब्देन न्यायशास्त्रमेव गृह्यते, तर्कशब्दस्य न्यायशब्दपर्यायत्वेन बहुभिः नैयायिकैः स्वीकारदर्शनात्, यथा – तर्कसंग्रहः, तर्कामृतम्, तर्कभाषा इत्यादीनां न्यायवैशेषिकदर्शनसम्बद्धानां ग्रन्थानां नाम तर्कशब्दद्वारैव लिखितमस्ति । कौटिल्येन च स्वकीयेऽर्थशास्त्रे आन्वीक्षिकीविद्याया लोकोपकारकत्वं प्रदर्शितमिति भाष्यकारेण वात्स्यायनेन उद्धृतं वर्तते – प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् । आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता ॥ (वात्स्यायनः, २०६९, पृ. ५) इति । अनेन ज्ञायते यत् स्मृत्यादिष्वपि प्रशस्तरूपेण न्यायशास्त्रस्योल्लेखः कृतः अस्ति, तेन च तत्समानतन्त्रस्य वैशेषिकस्यापि ग्रहणं भवति ।

यथोपनिषत्सु स्मृत्यादौ वा न्यायवैशेषिकशास्त्रस्योल्लेखो दृश्यते, तथैव पुराणेतिहासेष्वपि शास्त्रस्यास्य बहुत्र उल्लेखः प्राप्यते । मत्स्यपुराणे न्यायः, मीमांसा चेति द्वयमपि शास्त्रं प्रमाणप्रधानमति उक्तमस्ति यथा – अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः । मीमांसान्यायविद्याश्च प्रमाणाष्टकसंयुगाः ॥ (म. पु. ३–४) । अत्र 'च' इति पदेन मीमांसाशास्त्र–न्यायशास्त्रयोरनन्तरं वैशेषिकशास्त्रस्य ग्रहणं कर्तव्यम् । यथा कणादेन सूत्रेषु सप्तदशसंख्यका एव गुणा उक्ताः सन्ति, परन्तु सूत्रस्यान्ते च इति पदप्रयोगेण अन्ये सप्तगुणा अपि गृह्यन्ते इति प्रशस्तपादाचार्येण भाष्ये एव लिखित्वा चतुर्विंशतिसंख्यकाः गुणा वैशेषिकदर्शनसम्मता इत्युक्तं तथैवात्रापि च पदेन वैशेषिकस्य ग्रहणं भवतीति विश्लेषकैः स्वीक्रियते । तथैव पद्मपुराणे न्यायवैशेषिकसांख्यदर्शनानां तत्प्रवर्तकानां च नामानि स्पष्टरूपेण प्राप्यन्ते । यथा – कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् । गोतमेन तथा न्यायं सांख्यं तु कपिलेन वै ॥ (प. पु. उ. ख., २६३) । तथैव वाल्मीकिरामायणे आन्वीक्षिकीविद्याया उल्लेखो दृश्यते – धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः । बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते ॥ (वा. रा. अयो. १००–३९) इति तथैव महाभारतेऽपि आन्वीक्षिकीविद्याया उल्लेखः प्राप्यते – अहमासं पण्डितको हैतुको वेदननिन्दकः । आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् ॥ (महाभारत, शान्तिपर्व १८७–४७) इति अनेन ज्ञायते यत् पुराणेतिहासेष्वपि न्यायशास्त्रस्योलेखः प्राप्यते इति ।

एतावता परिशीलनेन सूत्ररचनायाः पूर्वकाले वैशेषिकशास्त्रस्य स्वरूपं कीदृशमासदिति ज्ञातम् । इदमेव उपनिषदादिषूक्तं वैशेषिकशास्त्रं स्वतन्त्रदर्शनत्वेन कदारभ्य आगतम्, को वाऽस्य प्रवर्तकः ? इत्यादिविषयाः सूत्ररचनाकाल इत्यस्मिन् प्रकरणे परिशील्यन्ते।

***वैशेषिकदर्शनस्य सूत्रकालः***

पूर्वस्मिन् प्रकरणे सूत्ररचनायाः पूर्वावस्थायां वैशेषिकदर्शनस्य स्वरूपं कीदृशमासीत्, एतद्दर्शनविषयाणां संकेतश्च केन रूपेणासीदिति परिशीलितम्। इतः परमस्य दर्शनस्य स्वतन्त्ररूपेण उदयः, विकासः, तत्कर्तारः, आचार्याः, तेषां ग्रन्थाः कालश्चेत्यादिविषयाः परिशीलनीया इत्यत एतस्मिन् प्रकरणे सूत्रकारस्य, भाष्यकारस्य च देशकालादिविषयाः परिशील्यन्ते।

**कणादः**. वैशेषिकदर्शनप्रवर्तको महर्षिः कणादः । अस्यैव अपरं नाम 'उलूकः' इति । पद्मपुराणे वैशेषिकदर्शनप्रवर्तकत्वेन कणादस्य नाम्न उल्लिखितत्वादपि इदं स्पष्टं भवति। तत्र – कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् । गोतमेन तथा न्यायं सांख्यं तु कपिलेन वै ॥ (पद्मपुराणम्, उत्तरखण्डः २६३) । अयमेव कणादः 'कणभुक्' इत्यप्यभिधीयते । उञ्छवृत्त्या धान्यादिकणान् सङ्कलय्य जीवति स्म, अतोऽस्य नाम 'कणभुक्' इत्यपि प्रसिद्धिर्वर्तते । 'कणान् भुङ्क्ते' इति कणभुक् 'कणान् अत्तीति' काणाद इति वास्य व्युत्पत्तिः । एतदेवाह आचार्यप्रशस्तपादः प्रशस्तपादभाष्यस्यान्ते – 'चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः' इति ॥ (प्रशस्तपादभाष्यम्, अन्त्यमङ्गलाचारणम्) । अयमाचार्यः कणादः कश्यपगोत्रीय आसीत्, अतोऽस्यापरं नाम 'काश्यपः' इत्यपि श्रूयते। तदेव प्रशस्तपादाचार्येण लिखितम् – 'विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत्' (प्रशस्तपादभाष्यम्, अनुमानप्रकरणम्) इति । अयं मिथिलादेशीय आसीदिति प्रायः सर्वैः स्वीक्रियते। परन्तु अस्य कालस्तु विवादित एव। काणादसूत्राणि न्यायसूत्रापेक्षया प्राचीनानीति तु उक्तमेव। न्यायसूत्रकर्तुः गौतमस्य काल ई. पू. ४०० आसीदित्यनुमीयते। अतः कणादस्य कालस्ततः पूर्वमेव। ब्रह्मसूत्रेषु च वैशेषिकसूत्राणां खण्डनं दृश्यते अतो वैशेषिकदर्शनं तत्पूर्वकालिकमित्यपि सुस्पष्टम् । वैशेषिकसूत्रेषु क्वचित् क्वचित् पाणिनिव्याकरणविरुद्धाः शब्दा दृश्यन्ते, यथा – द्रव्यं कार्यं कारणञ्च वधति' (वै. सू. १–१–१४) इति। अत्र वधति इति पदं पाणिनिव्याकरणशास्त्रविरुद्धम्। पाणिनेः कालः (ई. पू. १०००) इत्यनुमितमस्ति अतः कणादस्य काल ततः किञ्चित् पूर्वम् (ई. पू. ११००) आसीदिति अनुमीयते। वैशेषिकदर्शनं विशुद्धाध्यात्मदर्शनम्, यतोऽत्र प्रथमसूत्र एव धर्मव्याख्यानाय प्रतिज्ञा कृता। 'अथातो धर्मं व्याख्यास्यामः' (वै. सू. १–१–१४) इति। अतोऽस्मिन् दर्शने अन्येषां दर्शनानां खण्डनमण्डनं न तावत् प्राप्यते यावद् अन्येषु दर्शनेषु । अस्मिन् दर्शने विशेषतः परमाणुकारणवादश्चर्चितोऽस्ति । द्वित्वोत्पत्ति–पाक–विभागजविभागविषयेऽपि महती चर्चा प्राप्यतेऽत्र। अत एव प्रसिद्धा उक्तिरस्ति – 'द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे। यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः ॥' इति। सारांशे वक्तुं शक्यते यत् – कणाद एवास्य दर्शनस्य प्रथमाचार्यः, वैशेषिकसूत्राणि च प्रथमो ग्रन्थ इति।

**प्रशस्तपादाचार्यः**. प्रशस्तपादाचार्य एव वैशेषिकसूत्रस्य प्रथमो भाष्यकारः। वैशेषिकदर्शनस्यास्य काणादसूत्राणि समालोच्य प्रकरणग्रन्थरूपेण विस्तृतविवेचनपूर्वकं पदार्थधर्मसंग्रहसंज्ञकं ग्रन्थमरचयत् प्रशस्तपादाचार्यः। अत एवास्य ग्रन्थस्य 'प्रशस्तपादभाष्यमि'ति नाम्नापि व्यवहारो दृश्यते। यद्यपि 'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते

भाष्यं भाष्यविदो विदुः ॥' इत्येतस्य भाष्यलक्षणस्य तत्राभावात् नेदं भाष्यं किन्तु वैशेषिकदर्शनस्य स्वतन्त्रः प्रबन्धग्रन्थ इति केचित्। तथापि केचित्तु सूत्राक्षराणि क्रमशो न व्याख्यातानि तथापि सूत्रानुरोधि सुविस्तृतं व्याख्यानमस्तीति कृत्वा प्रबन्धमिमं भाष्यत्वेनैव स्वीकुर्वन्ति। प्रशस्तपादेन स्वयञ्चास्य नाम 'पदार्थधर्मसंग्रहः' इति दत्तं मङ्गलश्लोके – 'प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः। पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः ॥' इति (प्रशस्तपादभाष्यम्, मङ्गलाचारणम्)। अस्तु यत्किञ्चित्भवतु, तथापि अनेन ग्रन्थेन काणाददर्शनस्य निष्कृष्टं स्वरूपं प्रदर्श्यते इत्यत्र न कोऽपि विवादः। अयमेव ग्रन्थो वैशेषिकदर्शनस्य प्रधानभूतः। यदायं ग्रन्थः प्रकटितः तदनन्तरं तु काणादसूत्राण्यपि प्रायो लुप्तानीव जातानि। कालेऽस्मिन् येन केनापि प्रकारेण विदुषा वैशेषिकदर्शनविषयमवलम्ब्य यत्किमपि लिख्यते, तत्सर्वं प्रशस्तपादमूलकमेव भवति। अस्मिन्नेव ग्रन्थे सर्वप्रथमं वैशेषिकसिद्धान्तत्वेन सृष्टिलयक्रम–पीलुपाक–अणुपरिमाणादिविषया उल्लिखिताः। अस्याचार्यस्य प्रशस्तपादस्य कालोऽपि नास्ति निश्चितः। ग्रन्थलेखनशैलीदृष्ट्या, प्रतिपादितविषयदृष्ट्या च अस्य कालोऽनुमेयः। वात्स्यायनभाष्ये या शैली प्रयुक्ताऽस्ति तदपेक्षया सरला शैली अत्र प्रयुक्तास्ति। वात्स्यायनभाष्ये तत्पूर्वकालिकेषु वा नैकेष्वपि ग्रन्थेषु मङ्गलाचरणं दृश्यते, परन्त्वत्र प्रशस्तपादभाष्ये मङ्गलाचरणकृतत्वात् अयमाचार्यो वात्स्यायनाद् अनन्तरकालिक एव। न्यायसूत्रे भाष्ये चोक्तः, काणादसूत्रेऽनुक्तः अर्थापत्त्यादीनामनुमानेऽन्तर्भावविषयः प्रशस्तपादभाष्येऽपि उल्लिखितः, अतोऽयं वात्स्यायनादनन्तरकालिक इति मतं दृढं भवति। केषाञ्चन मते बोधायनसूत्रस्य प्रवराध्यायस्य आङ्गिरसगणान्तर्गते शारद्वतगणे उक्तः 'प्रशस्तनामकः' ऋषिरेव प्रशस्तपादभाष्यकार इति। बोधायनसूत्रस्य कालः ख्रिष्टाब्दस्य षष्ठशताब्दी (ई. सं. ५५०–६००) इति स्वीक्रियते। अतः प्रशस्तपादस्य कालः ख्रिष्टाब्दस्य पञ्चमशताब्दी (ई. सं. ५००) इत्यनुमीयते। तथैव प्रशस्तपादभाष्ये दिङ्नागोक्तनिदर्शनाभासस्य उल्लेखदर्शनाद् दिङ्नागादपि अनन्तरकालिक एवेति ज्ञायते, तथा च दिङ्नागस्य कालः ख्रिष्टाब्दस्य चतुर्थशताब्दी (ई. सं. ४००) इति, अस्य च ख्रिष्टाब्दस्य पञ्चमशताब्दी (ई. सं. ५००) इत्येव युक्तियुक्तं भवति। कणादप्रशस्तपादयोर्मध्ये सहस्राधिकवर्षाणामन्तरालमस्तीति अस्मदाचार्यपादानां वचनमपि प्रामाणिकमेव। वैशेषिकदर्शनाध्येतॄणां कृते महदुपकारिग्रन्थनिर्मितत्वात् प्रशस्तपादाचार्योऽपि कणादसदृश ऋषिकल्प एवेतिवक्तुं शक्यम्।

***व्याख्योपव्याख्याकालः***

प्रथमप्रकरणे सूत्ररचनायाः पूर्वावस्थायां वैशेषिकदर्शनस्य स्वरूपं कीदृशमासीत्, एतद्दर्शनविषयाणां संकेतश्च केन रूपेणासीदिति परिशीलितम्। ततो द्वितीयप्रकरणे सूत्रकाले अस्य दर्शनस्य स्वतन्त्ररूपेण उदयः, विकासः, तत्कर्तारः, आचार्याः, तेषां ग्रन्थाः कालश्चेत्यादिविषयाः परिशीलिताः। सूत्रकाले सूत्रभाष्यकारावेव आगतावित्यपि परिशीलितम्। सूत्रभाष्यकारयोर्मध्ये सार्धसहस्राधिकवर्षाणामन्तरालमासीदित्यपि प्रदर्शितम्। ततो भाष्यकारानन्तरं यैर्यैराचार्यैः वैशेषिकदर्शनस्य सूत्रभाष्यक्रमेण व्याख्योपव्याख्या विहिता, स्वतन्त्रग्रन्थाश्च रचिताः, त एव आचार्याः, ग्रन्थाश्चात्र तृतीये व्याख्योपव्याख्याकाले आगच्छन्तीति हेतोरस्मिन् प्रकरणे तेषामाचार्याणां ग्रन्थानाञ्चैतिकहासिकपरिशीलनं क्रियते।

**चन्द्रानन्दः.** चन्द्रानन्देनानेन कणादसूत्रोपरि वृत्तिः रचिता। सूत्रव्याख्यासु इयं वृत्तिरेव सर्वापेक्षया प्राचीना इति अनुमीयते। अस्या वृत्तेः सम्पादनम् 'ओरिएन्टल इन्स्टीच्युट बडौदा'द्वारा ई. सं. १९६१ तमे वर्षे कृतमासीत्। अस्य कालस्तु नास्ति निश्चितः। अनेन वृत्तौ उद्योतकरस्य नामोल्लिखितत्वात् उद्योतकरानन्तरमेव अयमासीदिति वक्तुं शक्यते। उद्योतकरः

ख्रिष्टाब्दस्य पञ्चमशताब्द्या उत्तरसमये षष्ठशताब्द्याः प्रारम्भे (ई. सं. ४५०–५५०) आसीदिति उच्यते। तथा सति अस्य कालः तदनन्तरकालिक एव स्यादिति वक्तुं शक्यते। एवञ्च भाष्यकारस्य प्रशस्तपादाचार्यस्य कालः ख्रिष्टाब्दस्य पञ्चमशताब्दी (ई. सं. ५००) अस्तीति पूर्वं निश्चितम्। तेन च भाष्यकारेण कुत्रापि अस्य नाम न गृहीतमित्यत अयमाचार्यः तदनन्तरकालिक इत्यपि वक्तुं शक्यते। ततश्च अस्य कालः ख्रिष्टाब्दस्य षष्ठशताब्द्या अन्त्ये, सप्तमशताब्द्याः प्रारम्भे वासीदिति अनुमीयते।

**चन्द्रः.**चन्द्रनामकेनानेन विदुषा 'दशपदार्थशास्त्रम्' इति नाम्ना पदार्थधर्मसंग्रहमूलकं शास्त्रं रचितम् । तस्यानुवादश्चीनीभाषायाम् अद्यापि लभ्यते। अस्य कालस्तु ख्रिष्टाब्दस्य सप्तमशताब्दी (ई. सं.६४८) इति स्वीक्रियते।

**रावणभाष्यम्.** काणादसूत्रोपरि रावणेन भाष्यं कृतमासीत् इति श्रूयते । यद्यप्ययं ग्रन्थो नोपलभ्यते तथापि पद्मनाभमिश्रस्य 'किरणावलीभाष्यकरः' इति ग्रन्थे, ब्रह्मसूत्रशांकरभाष्यस्य गोविन्दानन्दरचितटीकायां रत्नप्रभायाञ्च रावणभाष्यस्योल्लेखः प्राप्यते, परन्तु नाऽयं त्रेतायुगस्य लङ्केश्वरो दशानन इति (शर्मा : ई. २०२२ : पृ. १७२)।

**व्योमशिवाचार्यः.** वैशेषिकदर्शनपरम्परायां प्रशस्तपादानन्तरं व्योमशिवाचार्यस्यैव नाम आगच्छति । अनेनैव सर्वप्रथमं प्रशस्तपादभाष्योपरि 'व्योमवती' इति नामिका टीका रचिता सैव टीका अधुनापि सुप्रसिद्धास्ति दर्शनाकाशे । अयञ्च व्योमशिवाचार्यो दाक्षिणात्य आसीत्। अस्य कालः ख्रिष्टाब्दस्य सप्तमशताब्दी (ई. सं.६४५) आसीदीतीहासविद्भिः निश्चितमस्ति (शर्मा : ई. २०२२ : पृ. १७१)।

**श्रीधराचार्यः (श्रीधरभट्टः). अयं** श्रधराचार्यो बङ्गालप्रान्तस्य आसीत् । अस्य जन्मभूमिः बङ्गालप्रान्तस्य भूरिसृष्टिनामको ग्रामः । अनेन प्रशस्तपादभाष्योपरि 'न्यायकन्दली' नामिका अत्यन्तसुविस्तृता टीका रचिता । अस्यां टीकायां श्रीधराचार्येण बहवो नवीनसिद्धान्ताः प्रतिपादिताः। अधुना वर्तमानासु टीकासु इयमेव सर्वापेक्षया प्रसिद्धा। अस्य स्थितिकालस्तु श्रीधराचार्यः स्वयमेव न्यायकन्दल्या अन्ते लिखति – 'त्र्यधिकदशोत्तरनवशतशाकाब्दे न्याकन्दली रचिता' (न्यायकन्दली, अन्त्यमङ्गलाचरणम्) इति । ९१३ तमस्य शकाब्दस्य ईसवीयसंवत् ९१३+७८=९९१ भवति । अतोऽस्य स्थितिकालः ९९१ ईसवीयसंवत् आसीदिति सुस्पष्टम् । अस्य पितुर्नाम बलदेवः, मातुर्नाम 'अम्बिका' इत्यपि स्वयमेव लिखति न्यायकन्दल्यन्ते।

**उदयनाचार्यः.** उदयनाचार्यो वस्तुतस्तु नैयायिक आसीत्, तथापि न्यायवैशेषिकयोः समानतन्त्रत्वात् अनेन प्रशस्तपादभाष्योपरि च 'किरणावली' नामिका टीका रचिता । श्रीधरस्य न्यायकन्दल्यनन्तरं 'किरणावली' एव प्रशस्तपादभाष्यस्य प्रसिद्धा टीका । श्रीधरोदयनाभ्यामेव प्रप्रथमं 'अभावस्य' सप्तमपदार्थत्वं स्वीकृतं तत एव दर्शनमिदं 'सप्तपदार्थी' इति नाम्नापि व्याख्यातम्। यद्यपि न्यायकन्दलीकिरणावल्यौ द्वे अपि प्रशस्तपादभाष्योपरि एव रचिते टीके, तथापि उभयोः बहुत्र मतभेदो वर्तते, विशेषतः सृष्टिसंहारविषये। परन्तु द्वयोरपि आचार्ययोः समानकालत्वात् प्रत्यक्षरूपेण परस्परखण्डनं तु न दृश्यते । द्वाभ्यामपि आचार्याभ्यामितररचितग्रन्थोऽवलोकितो न स्यादिति । अस्य काल ईशाया दशमशताब्द्या अन्तिमभाग आसीदिति तेन स्वेनैव रचितस्य लक्षणावलीग्रन्थस्य अन्तिमश्लोके निर्दिष्टकालसंख्यया ज्ञायते। तत्र लिखति यत् – तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः। वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्॥ (विन्ध्येश्वरीप्रसादद्विवेदी,

२०६४, न्यायवार्तिकभूमिकायाम् पृ. १५९) इति । अत्र तर्काम्बराङ्कः (९०६) इत्यत्र शकसंवत्सर उल्लिखितोऽस्ति । अयं संवत्सरः ख्रिष्टाब्दस्य ९०६+७८=९८४ संवत्सरो भवति । अनेन निश्चीयते उदयनस्य स्थितिकालः । अस्य स्थानमपि केचन बङ्गालदेश इति कथयन्ति, केचन तु दक्षिणदेश इति कथयन्ति । परन्तु द्वयमपि न संगच्छते, यतो भविष्यत्पुराणे अस्य स्थानविषये स्पष्ट उल्लेखः प्राप्यते । तत्र – अथ वक्ष्ये तृतीयस्य हरेरंशस्य धीमतः । उदयनाचार्यनाम्नस्तु महात्म्यं लोकहर्षणम् ॥ भूत्वा स मिथिलायां तु शास्त्राण्यध्यैष्टसर्वशः । विशेषतो न्यायशास्त्रे साक्षाद्वै गौतमो मुनिः ॥ बौद्धसिद्धान्तमुग्धान्तः सुखाय हितकारिणीम् । वितेने विदुषां प्रीत्यै विमलां किरणावलीम् ॥ (भविष्यपुराणम्, ३०–१२३) । अत्र स्पष्टं 'मिथिलायां भूत्वा' इत्युक्तमस्ति, तेन उदयनस्य जनिभूः मिथिला आसीदिति निश्चप्रचम् । उदयनाचार्येण न्याशास्त्रे तात्पर्यपरिशुद्धिः, न्यायकुसुमाञ्जलिः, आत्मतत्त्वविवेकः, लक्षणावली, वैशेषिकशास्त्रे च किरणावली इत्यादिग्रन्था रचिताः । अस्य एते सर्वेऽपि ग्रन्था विषयप्रतिपादनदृष्ट्या उत्कृष्टतमाः । दर्शनक्षेत्रे एषां सर्वेषामपि ग्रन्थानां महत् सम्मानं वर्तते । अयं भक्तशिरोमणिश्चासीदित्यस्य जीवनचरित्रं पठित्वा ज्ञायते । वेदान् निरस्य ईश्वरोऽपि नास्तीति कथयतां हैतुकानां मतमनुमानेनैव निरस्य अनुमानेनैव ईश्वरोऽपि प्रतिपादितोऽनेन कुसुमाञ्जलौ । तत्रैकमनुमानमित्थं प्रदर्शयति– 'क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत् इति । न केवलमेतदेव अपि तु अन्या अपि युक्तयः प्रदर्शिता अनेनेश्वरसाधनाय कुसुमाञ्जलौ । तत्रोक्तम् – कार्याऽऽयोजनधृत्यादेः,पदात् प्रत्ययतः श्रुतेः । वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥ (न्यायकुसुमाञ्जलिः, ५–१) इति अतोऽयमीश्वरसत्तारक्षणाय, वेदरक्षणाय, धर्मस्थापनाय, नास्तिकमतनिरासनाय चागत आसीदिति सर्वैः दार्शनिकैः एकस्वरेणोच्यते ।

**शिवादित्यमिश्रः.** शिवादित्यमिश्रः 'सप्तपदार्थी' इति नामकं ग्रन्थं रचितवान् । ग्रन्थनाम्नैव ज्ञायतेऽस्मिन् ग्रन्थे अभावाख्यः सप्तमः पदार्थः स्वीकृतोऽस्ति । वैशेषिकदर्शने एव शिवादित्यमिश्रेण 'लक्षणमाला' इति नामकः स्वतन्त्रग्रन्थोऽपि रचितः । अस्य कालस्तु ख्रिष्टाब्दस्य दशम–एकादशशताब्दी (ई. सं. १०००–११००) आसीदित्यनुमीयते ।

**वल्लभाचार्यः.** अयं वल्लभाचार्यो ब्रह्मसूत्रस्याणुभाष्यकारवल्लभाचार्याद् भिन्नः । यतो हि तस्य कालः पञ्चदशशताब्दी (ई. सं. १५००), अस्य वल्लभाचार्यस्य तु द्वादशशताब्दीति । अनेन वल्लभाचार्येण वैशेषिकदर्शने 'न्यायलीलावती' नामको मौलिको ग्रन्थो रचितः । वैशेषिकदर्शने प्रशस्तपादभाष्यानन्तरम् अस्यैव ग्रन्थस्य प्राधान्यमस्ति । न्यायलीलावत्युपरि शंकरमिश्रेण 'कण्ठाभरणं' टीका रचिता । रघुनाथशिरोमणिना च 'दीधिति'नामिका टीका रचिता । वर्धमानोपाध्यायेनापि 'न्यायलीलतावतीप्रकाश' इति नामिका टीका रचितास्ति । गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ वल्लभाचार्यकृतव्याप्तेः लक्षणस्य खण्डनाद् अस्य कालः तस्मात् पूर्वमेवेति वक्तव्यम् । गङ्गेशस्य कालस्तु ख्रिष्टाब्दस्य चतुर्दशशताब्दी आसीत् । वादीन्द्रचित्सुखादिभिः विद्वद्भिरस्य सादरेण स्मरणात् तेषां कालादपि पूर्वमस्य काल इति ज्ञायते । तेषां कालस्तु ख्रिष्टाब्दस्य त्रयोदशशताब्दी आसीत् । अतो वल्लभाचार्यस्य कालः ख्रिष्टाब्दस्य द्वादशशताब्दी (ई. सं १२००) एवासीदिति वक्तुं शक्यते ।

**मिथिलावृत्तिः.** इयमपि वृत्तिः काणादसूत्राणामेव । वृत्तिकारस्तु अज्ञातः । वृत्तेः सम्पादनं प्रथमवारं 'मिथिलाविद्यापीठेन' ई. सं.१९५७ तमे वर्षे कृतमासीत् । अस्य सम्पादकः अनन्तलालदेवशर्मा । अस्यां वृत्तौ उदयनस्य नाम्न

उल्लिखितत्वात् । अस्या रचनाकालः प्रायः ख्रिष्टाब्दस्य द्वादश–त्रयोदयशताब्दी (ई. सं. १२००–१३००) आसीदिति अनुमीयते।

**शंकरमिश्रः.** मिथिलादेशीयोऽयं शङ्करमिश्रः 'वैशेषिकसूत्रोपस्कार'नामकं ग्रन्थं रचितवान् । अयमेव ग्रन्थः काणादसूत्राणामभिप्रायबोधयितुम् अत्यन्तोपयोगी । वैशेषिकदर्शनस्य प्रायः सर्वेऽपि ग्रन्थाः प्रशस्तपादभाष्यपरम्परायामागच्छन्ति, तथापि अयं ग्रन्थस्तु न तत्परम्परायाम् । अतः साक्षात् सूत्राणामेव उपस्कारकरणात् मौलिको ग्रन्थोऽयं वैशेषिकदर्शने पृथक् स्थानं ग्रहीतुमर्हति । शंकरमिश्रस्यास्य कालस्तु ख्रिष्टाब्दस्य षोडशशताब्दी (ई. सं. १५००–१६००) इत्यनुमीयते।

**पद्मनाभमिश्रः.** पद्मनाभमिश्रः तर्कभाषाकारकेशवमिश्रस्य भ्राता आसीत् । अनेन प्रशस्तपादभाष्योपरि 'सेतु'नामिका टीका लिखिता वर्तते । पद्मनाभमिश्रेण उदयनस्य किरणावल्युपरि अपि 'किरणावलीप्रकाशः' इति नामिका टीका लिखिता वर्तते । किरणावलीप्रकाशेऽस्मिन् एवायं लिखति– 'उपदिष्टा गुरुश्चरणैरस्पृष्टा वर्धमानेन, किरणावल्यामर्थास्तन्यन्ते पद्मनाभेन' इति । अनेन ज्ञायतेऽयं वर्धमानसमकालिकोऽस्ति किञ्चिदनन्तरकालिको वा । वर्धमानो गङ्गेशस्य पुत्र आसीत् । गङ्गेशस्य कालः ख्रिष्टाब्दस्य चतुर्दशशताब्दी आसीत् तथा च वर्धमानस्य कालः ख्रिष्टाब्दस्य सार्धचतुर्दशशताब्दी भवितुर्महति । तथा सति पद्मनाभमिश्रस्य कालः पञ्चदशशताब्दी (ई. सं. १५००) आसीदिति ज्ञायते।

**जगदीशभट्टाचार्यः.** बङ्गालप्रान्तस्य नदियाग्रामनिवासिनोऽस्य जगदीशभट्टाचार्यस्य प्रशस्तपादभाष्योपरि रचिता 'भाष्य–सूक्तिः' उपलभ्यते । वैशेषिकदर्शने अस्याः सूक्तेरपि महत् स्थानमस्ति । अस्य काल ख्रिष्टाब्दस्य षोडशशताब्दी आसीत् । अनेन न्यायदर्शने दीधित्युपरि टीका रचिता सैव टीकाधुना जागदीशी इति नाम्ना सम्पूर्णभारतदेशे प्रचलिता सम्मानिता च वर्तते । अनेन आलोकोपरि अपि टीका कृता वर्तते । 'शब्दशक्तिप्रकाशिका' 'तर्कामृतम्', न्यायादर्शम्, इति त्रयः स्वतन्त्रग्रन्था अपि रचिताः । अयं भट्टाचार्यवंशीय आसीत् । प्रबलपाण्डित्येन अनेन 'तर्कालङ्कारः' इत्युपाधिः प्राप्तः । अन्ते तेनैव नाम्ना प्रसिद्धो जातः ।

वैशेषिकदर्शनेऽन्येऽपि बहवो ग्रन्थाः प्राप्यन्ते, विस्तरभयात् सर्वेषामुल्लेखोऽत्रासम्भवः । केषाञ्चन विदुषां मते काणादसूत्रोपरि आत्रेयनामकस्याचार्यस्य वृत्तिरासीदिति श्रूयते । तथैव भारद्वाजवृत्तिरपि आसीदिति । मिथिलावृत्तेः सम्पादकस्य अनन्तलालदेवशर्मणः मते 'काणदसूत्रनिबन्धः' इति भट्टवादीन्द्रप्रणीतो ग्रन्थोऽपि अप्रकाशितो वर्तत इति । अस्मिन् काले तु सर्वतन्त्रस्वतन्त्रेण तर्कार्णव–पण्डितरत्न–अभिनवदेशिकादिविरुदविभूषितेन उत्तुमुर–वीरराघवाचार्येण रचितं वैशेषिकसूत्रव्याख्यानरूपं 'वैशेषिकदर्शनम्' इति नामकं शास्त्रं प्रसिद्धं वर्तते । अधुना तु न्यायवैशेषिकदर्शनयोः समानतन्त्रत्वात् उभयदर्शनम् अवलम्ब्य रचिताः समन्वयग्रन्था एवाधिकतया लभ्यन्ते । 'न्यायसिद्धान्तुमुक्तावली, तर्कसंग्रहः, तर्कभाषा इत्यादिग्रन्था अस्मिन्नेव प्रकरणे आगच्छन्ति, अतोऽत्र समन्वयपरम्परायामागतानामाचार्याणां संक्षेपेणेतिहासः परिशील्यते।

**विश्वनाथ‘पञ्चानन’भट्टाचार्यः.** अयमपि बङ्गाली पण्डित आसीत्। अनेन शुद्धन्यायपरम्परायां न्यायसूत्रोपरि वृत्तिः लिखिता, सेदानीं ‘विश्वनाथवृत्तिः’ इति नाम्ना प्रसिद्धा वर्तते। परन्तु अस्य ख्यातिः मुक्तावलीकाररूपेण वर्तते। अनेन वैशेषिकोक्तसप्तपदार्थान् आदाय तेनैव क्रमेण प्रथमं ‘कारिकावली’ग्रन्थो रचितः। तत्र १६८ संख्यकाः कारिकाः सन्ति। तत्रैवानेन नैयायिकोक्तानि चत्वार्येव प्रमाणानि प्रतिपादितानि। अतो ग्रन्थोऽयं न्यायवैशेषिकमिश्रितपरम्परायां वर्तत इति वक्तुं शक्यते। यद्यप्यनेन प्रथमं कारिकावली एव रचिता आसीत् तथापि स्वशिष्ये राजीवे दयया वशंवदः सन् तासां कारिकाणां स्वेनैव व्याख्यानं कृतम्। तदेव व्याख्यानमिदानीं ‘न्यायसिद्धान्तमुक्तावली’ इति नाम्ना प्रसिद्धमस्ति। मुक्तावल्यां स स्वयमेव लिखति – निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः । विशदीकरवाणि कौतुकान्नु राजीवदयावशंवदः ॥ (विश्वनाथः, न्यायसिद्धान्तमुक्तावली, मङ्गलाचरणम् ३ ) इति। अनेनैव ग्रन्थेन अस्य नाम ‘मुक्तावलीकारः’ इति प्रसिद्धं जातम्। अयं ग्रन्थो न्यायवैशेषिकशास्त्राध्येतॄणां कृते अत्यन्तमुत्कृष्टो वर्तते। अत्यन्तसरलया भाषया अनेन अस्मिन् ग्रन्थे विषयाः प्रतिपादिताः सन्ति। इदानीं सर्वेष्वपि संस्कृतविश्वविद्यालयेषु न्यायशास्त्रस्य पाठ्यक्रमे प्रथमावस्थायामयमेव ग्रन्थः पाठ्यग्रन्थत्वेन स्वीकृतोऽस्ति। अधुनायं ग्रन्थो बह्वीषु भाषासु प्रकाशितो वर्तते। अस्योपरि बहुटीका रचिताः सन्ति। तासु दिनकरी, रामरुद्री, किरणावली इत्यादिप्रसिद्धाः सन्ति। अस्य कालस्तु १५५६ शकसम्वत्सर आसीत्। यद्यप्ययं भट्टाचार्यवंशे जातस्तथापि सर्वविद्यासु निष्णातत्वात् अनेन ‘पञ्चाननः’ इत्युपाधिः प्राप्तः। तत एव विश्वनाथ‘पञ्चानन’भट्टाचार्य इति नाम्ना सुप्रसिद्धः सम्भूतः।

**केशवमिश्रः.** न्यायदर्शनस्य प्रमाणादिपदार्थानाम्, वैशेषिकोक्तसप्तपदार्थानाञ्च ज्ञानं सरलतया सर्वैः कर्तुम् अशक्यत्वात् तज्ज्ञानाय एकस्य प्रकरणग्रन्थस्य अपेक्षासीद् दर्शनक्षेत्रे। तामेवापेक्षां पूरणाय अयं केशवमिश्रः ‘तर्कभाषा’ इति नामकं ग्रन्थं रचितवान् । सूत्रभाष्यवार्तिकादिग्रन्था अल्पमतिमतां जनानां दुष्साध्या एवासन्, अतस्तेषां न्यायशास्त्रे वैशेषिकशास्त्रे च सुखेन प्रवेशो भवतु इति भावनया मयाऽयं ग्रन्थो रचित इति केशवमिश्रः स्वयं ग्रन्थादौ उद्घोषयति – बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छल्यलसः श्रुतेन । संक्षिप्तयुक्त्यन्वितर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥ (केशवमिश्रः, तर्कभाषा : मङ्गलाचरणम् ) इति। प्रमाणादिपदार्थानां क्रमेणैव विवक्षितत्वाद् अयम् एव ग्रन्थः प्राचीनन्यायस्य प्रथमः प्रकरणग्रन्थः । अस्मिन् ग्रन्थे सूत्रोक्तप्रमेयान्तर्गतार्थपदार्थ एव वैशेषिकोक्तसप्तपदार्थानाम् अन्तर्भावकृतत्वात्, न्यायवैशेषिकयोः द्वयोः दर्शनयोः समन्वयः सर्वप्रथमम् अनेनैव कृत इति वक्तुं शक्यते। अतोऽयं ग्रन्थो द्वयोरपि दर्शनयोः अध्येतॄणां कृते अत्युपकारीति न संशयः । अस्यापि कालादिविषये निश्चयेन वक्तुं न शक्यते । तथापि अयं गङ्गेशोपाध्यायानन्तरकालिकः, प्रायः वर्धमानोपाध्यायसमकालिक आसीदिति गोवर्धनमिश्ररचितस्य तर्कभाषाप्रकाशनामकग्रन्थस्यावलोकनेन ज्ञायते। तत्र तेन गोवर्धनमिश्रेण तर्कभाषाकारः पद्मनाभस्यानुजः अस्ति इति परिचयो दत्तोऽस्ति– ‘श्रीविश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा । तनोति तर्कानधिगत्य सर्वान् श्रीपद्मनाभाद्विदुषो विनोदम् ।’ इति। तेन पद्मनाभेन उदयनस्य किरणावल्युपरि ‘किरणावलीप्रकाश’ इति नाम्नी टीका रचिता वर्तते। तत्र स वर्धमानस्य नामोद्धरति – ‘उपदिष्टा गुरुचरणैरस्पृष्टास्तन्यन्ते पद्मनाभेन’ इति। अनेन सुस्पष्टं भवति यत् पद्मनाभो वर्धमानसमानकालिकः किञ्चिद् अनन्तरकालिको वा। अतः तस्यानुजोऽयं केशवमिश्रोऽपि वर्धमानात् किञ्चिदनन्तरकालिकः। तथा च अस्य काल ख्रिष्टाब्दस्य पञ्चदशशताब्दी आसीदिति वक्तुं शक्यते। अस्य स्थानन्तु मिथिलादेश एव।

**अन्नंभट्टः.** न्यायशास्त्रे वैशेषिकशास्त्रे च बहुभिः पण्डितैः बहवो ग्रन्था रचिताः । परन्तु ते सर्वेऽपि ग्रन्था न्यायशास्त्राध्येतॄणां तत्र प्रवेशोत्सुकानां वा बालानां कृते दुर्बोध्याः, दुर्ग्राह्याः सञ्जाताः पश्चात्तनकाले । यद्यपि प्रवेशकरणाय 'न्यायसिद्धान्तमुक्तावली' आसीत् तथापि सा अल्पमतिमतां कृते क्लेशसाध्या एवासीत् । अतस्तादृशस्य ग्रन्थस्य महती आवश्यकतासीत्, येन बालाः सरलतया न्याशास्त्रं ज्ञातुं शक्नुयुः । तामेवावश्यकतां पूरयितुं महता विदुषा अन्नंभट्टेन 'तर्कसंग्रहः' नामकोऽत्यल्पः परन्तु अत्युपकारी ग्रन्थो रचितः । स्वयमेव मङ्गलाचरणे कथयति – 'निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् । बालानां सुखबोधाय क्रियते तर्कसंग्रहः' । (अन्नंभट्टः, तर्कसंग्रहः, मङ्गलाचरणम् ) इति । यद्यपि केशवमिश्रस्य तर्कभाषापि प्रवेशग्रन्थ एव, तथापि तत्र केवलं नैयायिकरीत्या विषयाः प्रतिपादिता आसन् परन्तु 'बालस्वभावः सर्वदा सरलमेवापेक्षते' इति वचनानुसारं न्यायवैशेषिकदर्शनयोः प्रवेशस्य कृते एकस्य द्वारस्याभाव आसीदेव । अत उभयपरम्परया रचितेन ग्रन्थेन तर्कसंग्रहेण सोऽभावः पूरितः । अस्मिन् तर्कसंग्रहे वैशेषिकोक्तसप्त पदार्थाः, न्यायोक्तानि चत्वारि प्रमाणानि च सरलतया प्रतिपादितानि । अतोऽत्र विद्यमानः प्रमेयभागो वैशेषिकदर्शनस्य भागः, प्रमाणभागस्तु न्यायदर्शनस्य भाग इत्यपि बुधैः विभज्यते । अस्य ग्रन्थस्य महत्त्वमस्ति यद् अयं ग्रन्थः सर्वत्र विश्वविद्यालयेषु पाठ्यक्रमे वर्तते । अस्यानुवादो बह्वीषु आंग्लादिभाषासु च प्राप्यते । पाश्चात्त्यैः अप्ययं ग्रन्थः स्वपाठ्यक्रमे स्वीकृतः । अस्य बहुभिः सम्पादनञ्च कृतमस्ति । तेषु पाश्चात्यविदुषः बोडासमहोदयस्य सम्पादनं प्रधानमस्ति । अस्योपरि बहुटीका रचिताः सन्ति । अधुना च टीकारचनाक्रमः प्रचलत्येव । तासु टीकासु ग्रन्थकर्तुः एव 'दीपिका' इति नाम्नी टीका प्रसिद्धा वर्तते । पदकृत्यम्, न्यायबोधिनी, सिद्धान्तचन्द्रोदय इत्याद्यनन्तटीकाः प्राप्यन्ते । अयम् अन्नम्भट्टो दाक्षिणात्यः, आन्ध्रदेशीयः तैलङ्गब्राह्मण आसीत् । अयं विद्यानगरीं काशीं गत्वा शास्त्राणि अधीतवान् । अयं शैवसम्प्रदाये आसीदिति अस्य मङ्गलश्लोकेनैव ज्ञायते । तत्र किल अयं स्वेष्टदेवस्य विश्वनाथस्य स्तुतिं करोति । तथाहि – 'निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् । बालानां सुखबोधाय क्रियते तर्कसंग्रहः' । (अन्नंभट्टः, तर्कसंग्रहः, मङ्गलाचरणम् ) इति । अस्य रचनाकालः सप्तदशशताब्दी ई. सं.१६२३ आसीदिति मनीषिभिः स्वीक्रियते । यावत्पर्यन्तं जगति दर्शनशास्त्रं जीवति तावत्पर्यन्तमयम् अन्नंभट्टो विद्वत्सभायां सादरेण जीवति इति नात्र लेशतोऽपि संशयः ।

## निष्कर्षः

निष्कर्षे तावद् वक्तुं शक्यते यद् वैशेषिकशास्त्रं वैशेषिकदर्शनं वा अनादिकालादेव प्रवृत्तम् । श्रुतिस्मृतीतिहासपुराणेषु च अस्य दर्शनस्योल्लेखः, एतद्दर्शनविषयाः, सूत्रकारस्य नामोल्लेखश्च प्राप्यन्ते इति तत्तद्ग्रन्थाध्ययनेन ज्ञायते । वैशेषिकदर्शनस्येतिहासं प्राक्सूत्रकालः, सूत्रकालः, व्याख्योपव्याख्याकालश्चेति त्रिषु खण्डेषु विभक्तुं शक्यते । अनादिकालात् सूत्रकालपार्यन्तिकः कालः प्राक्सूत्रकालत्वेन गृह्यते चेत् सूत्रकारस्य कालात् भाष्यकारस्य कालपार्यन्तिकः कालः सूत्रकालत्वेन वक्तुं शक्यते । तदनन्तरमधुना यावद् व्याख्योपव्याख्याकालत्वेन परिगणयितुं शक्यते । अनादिकालात् प्रवृत्तमिदं वैशेषिकशास्त्रं महर्षिणा कणादेन सूत्रेषु निबद्धम् । सूत्रकारस्य कणादस्य कालस्तु ख्रिष्टाब्दस्य पूर्वमेकादशशताब्दीति अनुमीयते । तानि च सूत्राणि दशाध्यायेषु, विंशत्याह्निकेषु च ग्रथितानि । तेषां सूत्राणां प्रशस्तपादाचार्येण भाष्यं विहितम् । तस्य भाष्यस्य नाम पदार्थधर्मसंग्रहः इति । सूत्रकारभाष्यकारयोर्मध्ये प्रायः सार्धसहस्राधिकवर्षाणामन्तरालं दृश्यते । एवञ्च भाष्यकारानन्तरं श्रीधराचार्य–वल्लभाचार्य–उदयनाचार्य–शंकरमिश्रप्रभृतिभिः बहुभिः विद्वद्भिरनेकग्रन्थप्रणयनेन अस्य दर्शनस्य विस्तारः कृतः

। ततश्च केशवमिश्र–विश्वनाथपञ्चाननभट्टाचार्य–अन्नंभट्टप्रभृतिभिः विद्वद्भिः तर्कभाषा–न्यायसिद्धान्तमुक्तावली–तर्कसंग्रहादिग्रन्थानां प्रणयनेन न्यायवैशेषिकदर्शनयोः समन्वयं विधाय एतयोः समानतन्त्रत्वं प्रतिष्ठापितम् । ततोऽद्यावधि च प्रायो दर्शनक्षेत्रे प्रमाणभागो न्यायदर्शनानुसारेण स्वीक्रियते चेत् पदार्थभागो वैशेषिकदर्शनानुसारेण स्वीक्रियते । न केवलं न्यायदर्शने अपि तु प्रायः सर्वेष्वपि प्राच्यदर्शनेषु, कतिपयविषयान् आदाय पाश्चत्त्यदर्शनेषु च वैशेषिकदर्शनोक्तपदार्थविवेचनप्रक्रिया एव अवलम्बिता अस्तीत्यनेन ज्ञायते यद् दर्शनस्यास्य सर्वेषु दर्शनेषु महान् प्रभावोऽस्ति । एवञ्च महर्षिणा कणादेन प्रवर्धितमिदं वैशेषिकदर्शनं सूत्ररचनाकालदृष्ट्या सर्वापेक्षया प्राचीनं सदपि स्ववैशिष्ट्येन इतराणि दर्शनानि च प्रकाशयत् ''काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्'' इति कथनं सार्थकञ्च कुर्वत् समग्रजगति राराजते इति एतद्दर्शनस्येतिहासाचार्यसाहित्यादीनामध्ययनेन ज्ञायते ।

### सन्दर्भसूची


उदयनाचार्यः (ई. १९८०). *कीरणावली*. सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

प्रशस्तपादाचार्यः (ई. १९९७). *प्रशस्तपादभाष्यम्*. सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

भट्टः, अन्नम् (ई. २००३). *तर्कसंग्रहः* (व्याख्याचतुष्टयोपेतः). चौखम्बा विद्याभवनम् ।

भट्टराई, पद्मप्रसाद (२०६४). *पौरस्त्य दर्शन: एक चिनारी*. विद्यार्थी पुस्तक भण्डार ।

भट्टाचार्यः, विश्वनाथः (ई. २००३). *न्यायसिद्धान्तमुक्तावली* (कीरणावलीसहिता). चौखम्बा संस्कृत संस्थानम् ।

मनुः (ई. २०१८). *मनुस्मृतिः*. चौखम्बा विद्याभवनम् ।

मिश्रः, केशवः (ई. १९९७). *तर्कभाषा*. भारतीय विद्या प्रकाशन ।

मिश्रः, शङ्करः (२०६४). *वैशेषिकसूत्रोपस्कारः*. चौखम्बा संस्कृत संस्थानम् ।

याज्ञवल्क्यः (२०७६). *याज्ञवल्क्यस्मृतिः*. रत्न पुस्तक भण्डार ।

वल्लभाचार्यः (ई.१९९१). *न्यायलीलावती*. चौखम्बा संस्कृत सिरिज ।

वात्स्यायनः (ई. १९९८). *न्यायभाष्यम्* (प्रसन्नपदाव्याख्यायुतम्). बौद्धभारती ।

वाल्मीकिः (ई.२००५). *श्रीमद्वाल्मीकीय रामायणम्* (हिन्दी अनुवादसहित). गीताप्रेस ।

वेदव्यासः (२०७९). *महाभारत (पञ्चम खण्ड)*. गीताप्रेस ।

वेदव्यासः (२०७८). *मत्स्यपुराण* (हिन्दी अनुवादसहित). गीताप्रेस ।

शर्मा, चन्द्रधर (ई. २०२२). *भारतीय दर्शन: आलोचन और अनुशीलन*. मोतीलाल बनारसीदास ।

श्रीधराचार्यः (ई. १९९७). *न्यायकन्दली*. सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

शर्मा, राममूर्ति (सम्पा.) (ई. २००२). *न्याय एवं वैशेषिक दर्शन*. ब्रह्मवर्चस ।

सक्सेना, प्रवेश (ई. २००५). *भारतीय दर्शनों में क्या है*. पुस्तक महल ।

सर्वपल्ली राधाकृष्णन् (ई. १९७३). *भारतीय दर्शन*. राजपाल एण्ड सन्स ।